**दृङ्मण्डल** न० दृशः तत्प्रचारस्य मण्डलमिव । सि०शि० उक्ते गोलबन्धान्तर्गते वलयाकारे मण्डलभेदे यथोक्तं तत्र "ऊर्द्ध्वाधरस्वस्तिककीलयुग्मे प्रोतं श्लथं दृग्वलयं तदन्तः । कृत्वा परिभ्राम्य च तत्र तत्र नेयं ग्रहो गच्छति यत्र यत्र । ज्ञेयं तदेवाखिलखेचराणां पृथक् पृथग्वा रचयेत् तथाष्टौ । दृङ्मण्डलं वित्रिभलग्नकस्य दृक्क्षेपवृत्ताख्यमिदं वदन्ति" खस्वस्तिके चाधःस्वस्तिके चान्तःकीलकौ कृत्वा तयोः प्रोतं श्लथं दृग्वलयं कार्यम् । तत्तु पूर्ववृत्तेभ्यः किञ्चिन्न्यूनं कार्यम् । यथा खगोलान्तर्भवति । यद्येक एव ग्रहगोलस्तदैकमेव दृङ्मण्डलम् । यो यो ग्रहो यत्र यत्र वर्त्तते तस्य तस्योपरीदमेव परिभ्राम्य विन्यस्य दृग्ज्याशङ्क्वादिकं दर्शनीयम् । अथ वा पृथक् पृथगष्टौ दृङ्मण्डलानि रचयेत् । तथाष्टमं वित्रिभलग्नस्य तच्च दृक्क्षेपमण्डलम्" दृग्वलयमप्यत्र

**दृढ़** त्रि० दृह दृहि वा वृद्धौ क्तः "स्थूलबलयोः" इडभावः दृदितोऽपि नि० नलोपः । १स्थूले २अशिथिले प्रगाढे ३बलवति च मेदि० ४कठिने अमरः ५लौहे न० शब्दच० । भावे क्त । ६अतिशये न० अमरः । क्रियाविशेषणत्वेऽस्य क्लीवता "दृढ़भक्तिरिति ज्येष्ठे" रघुव्या० "दृढ़ भक्तिरस्येति विग्रहः" मल्लिना० । "दृढ़ा भक्तिश्च केशवे" विष्णुस्तवः । दृढ़त्वं च काठिन्यं तच्च स्पर्शत्वव्याप्यं जातिभेदः, अशिथिलावयवसंयोगभेदः, उपचारात् अतिशयश्च । "दृढकारी मृदुर्दान्तः क्रूराचारैरसंवसन्" मनुः "दृढग्राही करोमीति जप्यं जपति जापकः । न संपूर्णो न संयुक्तो निरयं सोऽनुगच्छति" भा०शा० १९७अ० । दृढ़स्य भावः इमनिच् द्रढ़िमन् तद्भावे पु० "बधान द्रागेव द्रढ़िमरमणीयं परिकरम्" गङ्गालहरी त्व दृढत्व न० तल् दृढता स्त्री ष्यञ् दार्ढ्य न० स्थौल्ये अतिशये च । अतिशयेन दृढः इष्ठन् ऋतोरः द्रढिष्ठ ईयसुन् द्रढीयस अतिशयेन दृढ़े त्रि० ईयसुनि स्त्रियां ङीप् । दृढं करोति णिच् ऋतोरः । द्रढयति "वियोगो वैराग्यं द्रढ़यति च" प्रबोधचन्द्रो० त्रयोदशमनोः रुचेः ७पुत्रभेदे पु० । "त्रयोदशस्य पुत्रास्ते विज्ञेयास्तु रुचेः सुताः । चित्रसेनो विचित्रश्च नयो धर्मभृतोधृतः । सुनेत्रः क्षत्रबुद्धिश्च सुतपा निर्भयो दृढः । रौच्यस्यैते मनोः पुत्रा अन्तरे तु त्रयोदशे" हरिवं० ७अ० । ८धृतराष्ट्रपुत्रभेदे पु० "पुत्रास्तेऽभ्यर्दयन् भीमं दश दाशरथेः समाः । नागदत्तो दृढ़रथो वीरबाहुरयोभुजः । दृढः सुहस्तो विरजाः प्रमाथ्युग्रोऽग्रयाय्यपि । तान् दृष्ट्वा चुक्रुधे भीमो जगृहे भारसाधनान् । एकमेकं समुद्दिश्य पातयामास मर्मसु । ते विद्धा व्यसवः पेतु स्यन्दनेभ्योऽमितौजसः" भा०द्रो० १५७अ० ९विष्णौ पु० "वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः" विष्णुसं० "स्वरूपसामर्थ्यादिः प्रच्युत्यभावात् दृढः" भा० १०रूपकभेदे पु० "दृढः प्रौढोऽथ खचरो विभवस्तुरङ्गमः । निःशारुकः प्रतितालः कथिताः सप्त रूपकाः" इत्युद्दिश्य "दृढाख्यः स्याद् लघुद्वन्द्वं तालेऽत्र हंसलीलके । चतुर्दशाक्षरयुतः शृङ्गारे परिकीर्त्तितः" सङ्गीतदा० । लीला० उक्ते ११कुट्टकगणितभेदे कुट्टकशब्दे दृश्यम् । [शटकयुक्ते वृत्तभेदे शब्दर० ।

**दृढकण्टक** पु० दृढः कण्टकोऽस्य । (धला आकड़ा) क्षुद्रक-

**दृढकाण्ड** पु० दृढः कठिनः काण्डः स्कन्धोऽस्य । १वंशवृक्षे २दीर्घरोहिषके च राजनि० ।

**दृढच्युत** पु० धृतराष्ट्रपुत्रभेदे "दृढवर्मा दृढक्षत्रः सोमकीर्त्तिरनूदरः" भा०आ० ६७अ० तत्पुत्रोक्तौ ।

**दृढक्षुरा** स्त्री दृढं क्षुरमिवाग्रं यस्याः । वल्वजायाम् तृणभेदे राजनि० ।

**दृढगात्रिका** स्त्री दृढं गात्रमस्याः कप् कापि अत इत्त्वम् । मत्स्यण्ड्यां फाणिते शब्दच० ।

**दृढग्रन्थि** पु० दृढो ग्रन्थिः पर्वास्य । १वंशे राजनि० २कठिनग्रन्थियुक्तमात्रे त्रि० ।

**दृढच्छद** न० दृढः छदोऽस्य । दीर्घरोहिषकेतृणे राजनि० ।

**दृढच्युत** पु० परपुरञ्जयनृपात्मजायां जाते अगस्त्यमुनिपुत्रे इध्मवाहापरनामके मुनिभेदे "उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः । युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः । तस्यां संजनयाञ्चक्रे आत्मजामसितेक्षणाम् । यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः । अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् । यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः" भाग० ४।२८।२८ । पादपूरणार्थः सन्धिरार्षः । अयं गोत्रप्रवरविशेषः प्रवराध्याये दृश्यः ।

**दृढतरु** पु० नित्यकर्म० । धववृक्षे राजनि० । दृढवृक्षोऽप्यत्र

**दृढतृण** पु० दृढं कठिनं तृणमस्य । १मुञ्जतृणे २वल्वजायां स्त्री राजनि० ।

**दृढत्वच्** पु० दृढा त्वगस्य । यावनालशरे राजनि० ।

**दृढदंशक** पुंस्त्री दृढं दंशति दन्श–ण्वुल् । (हाङ्गर) ख्याते जलजन्तुभेदे शब्दार्थकल्प० । स्त्रियां ङीष् ।